# Rajasattamebhyah Harina Dattah Svamantrah

# राजसत्तमेभ्यः हरिणा दत्ताः स्वमन्त्राः

## Document Information

Text title : Rajasattamebhyah Harina Dattah Svamantrah

File name : rAjasattamebhyaHhariNAdattAHsvamantrAH.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, mantra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 79/75-91||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# राजसत्तमेभ्यः हरिणा दत्ताः स्वमन्त्राः

सर्वोत्कृष्टं गृहे यद्यद्राज्ये राष्ट्रे तथोत्तमम् ।
तत्तच्छ्रीकृष्णसेवायां न्यधुस्ते राजसत्तमाः ॥ ७५॥

आरार्त्रिकं प्रचक्रुश्च पपुः पादामृतं हरेः ।
प्रसादं भक्षयामासुः श्रीस्वामिकृष्णहस्ततः ॥ ७६ ॥

सेवयामासुरत्यर्थं पादसंवाहनादिभिः ।
एनं प्रसादयामासुर्भक्त्या पद्मावतीपतिम् ॥ ७७॥

जगृहुस्ते महामन्त्रान् प्रज्ञानारायणाननात् ।
“ॐ नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा” ॥ ७८॥

“शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा ।
कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ॥ ७९॥

शूलमीनध्वजधनुश्चक्रस्वस्तिवानव” ।
“ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः” ॥ ८०॥

“ब्राह्म्यहं श्रीकृष्णनारायणदासी भवामि ओम्” ।
“ॐ नमः श्रीकृष्णनारायणाय पतये स्वाहा” ॥ ८१॥

“अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे” ।
“बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ॥ ८२॥

पिता बन्धुः सुहृन्मित्रं रक्षकः पोषकोऽस्तु सः” ।
“बालकृष्णाय विद्महेऽनादिकृष्णाय धीमहि ।
तन्नः श्रीशः प्रचोदयात् ॥ ८३॥

“ॐ श्रीलक्ष्म्यै महालक्ष्म्यै दुःखभङ्क्र्यै श्रियै नमः” ।
“ॐ मां श्रीबालकृष्णाय समर्पयामि ॐ नमः” ॥ ८४॥

“कृष्णनारायणभक्तोऽहं श्रीहरिः शरणं मम” ।

“श्रीकृष्णो वल्लभः स्वामी श्रीस्वामी शरणं मम” ॥ ८५॥

“श्रीकृष्णः श्रीहरिः स्वामी श्रीपतिः शरणं मम” ।
“श्रीकृष्णो वैष्णवाचार्यः प्रभुः पद्मावतीपतिः ॥ ८६ ॥

स्वामी मे शाश्वतः कान्तस्तस्याऽहं स्वामिनी प्रिया” ।
“प्रभुः कृष्णः पारमेशः श्रीकृष्णः शरणं मम” ॥ ८७॥

“प्रभुः कृष्णः पार्वणो नारायणः शरणं मम” ।
एतान्मन्त्रान् ददौ कृष्णनारायणः स्वयं हरिः ॥ ८८॥

“कृष्णनारायण कृष्णनारायण नरायण ।
अनादिश्रीकृष्णनारायण राधारमायण ॥ ८९॥

“प्रभो नारायण माधवीश्रीनारायण प्रभो ।
जयानारायण श्रीललितानारायण! विभो” ॥ ९०॥

“कम्भरागोपाललालः स्वामी पतिश्च मामव” ।
एवं मन्त्रान् नामधुन्यं ददौ चापि स्वयं हरिः ॥ ९१॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः तिष्यसन्तानात्मकस्य चतुर्थखण्डे
७९-अध्यायान्तर्गतं राजसत्तमेभ्यः हरिणा दत्ताः स्वमन्त्राः ।

लक्ष्मीनारायणीयसंहिता । खण्ड ४। अध्याय ७९/७५-९१॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 79/75-91..

Proofread by PSA Easwaran

*Rajasattamebhyah Harina Dattah Svamantrah*
pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*